Roll No.
रोल नं.

| | | | | |
|---|---|---|---|---|
| | | | | |

**Code No. 102**

Candidates must write the Code on the title page of the answer-book.
परीक्षार्थी कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें।

# SANSKRIT (A)
# संस्कृत (अ)

***General Instructions :***

***सामान्य निर्देश :***

***Read the following instructions very carefully and strictly follow them .***

***निम्नलिखित निर्देशों को ध्यान से पढ़ें एवं पूर्णरूप से उनका अनुपालन करें।***

*Time allowed : 3 hours* — *Maximum marks : 80*

*निर्धारितः समय : होरात्रयम्* — *अधिकतमाङ्काः : 80*

**Note / नोट :**

(i) *Please check that this question paper contains* **12** *printed pages.*
*कृपया जाँच कर लें कि इस प्रश्न-पत्र में 12 मुद्रित पृष्ठ हैं।*

(ii) *Please check that this question paper contains* **18** *questions.*
*कृपया जाँच कर लें कि इस प्रश्न-पत्र में 18 प्रश्न हैं।*

(iii) *This question paper comprises four sections -* ***Section - A, Section - B, Section - C*** *and* ***Section - D****.* ***All*** *questions are* ***compulsory****.*
*यह प्रश्न-पत्र चार खण्डों में विभाजित किया गया है –* ***खण्ड – क, खण्ड – ख, खण्ड – ग*** *एवं* ***खण्ड – घ।***
***सभी*** *प्रश्न* ***अनिवार्य*** *हैं।*

(iv) ***Section - A :*** *has only* **1** *Question which carry* **10** *marks.*
***खण्ड – क :*** *में केवल* ***एक*** *प्रश्न हैं, 1 जो 10 अङ्क का है।*

(v) ***Section - B :*** *has* **3** *Questions i.e. from Question number* **2** *to* **4** *which carry* **5** *marks each.*
***खण्ड – ख :*** *में* ***तीन*** *प्रश्न हैं, प्रश्न संख्या 2 से प्रश्न संख्या 4 तक हैं, प्रत्येक प्रश्न 5 अङ्क का है।*

(vi) ***Section - C :*** *has* **4** *Questions i.e. from Question number 5 to* **8***. Q. No.* **5** *carry* **6** *marks. Q. No.* **6** *carry* **5** *marks; Q. No.* **7** *carry* **6** *marks; and Q. No.* **8** *carry* **3** *marks.*
***खण्ड – ग :*** *में* ***चार*** *प्रश्न हैं, प्रश्न संख्या 5 से प्रश्न संख्या 8 तक हैं, प्रश्न संख्या 5 के लिए 6 अङ्क है। प्रश्न संख्या 6 के लिए 5 अङ्क; प्रश्न संख्या 7 के लिए 6 अङ्क तथा प्रश्न संख्या 8 के लिए 3 अङ्क निर्धारित हैं।*

(vii) ***Section - D** has **10** Questions, Question no. **9** to **18** :*
*Q. No. **9** to **11** carry **5** marks each;*
*Q. No. **12** and Q. No. **13** carry **3** marks;*
*Q. No. **14** and Q. No. **15** carry **2** marks;*
*Q. No. **16** and Q. No. **17** carry **3** marks and*
*Q. No. **18** carry **4** marks.*
***खण्ड** –**'घ'** में **10** प्रश्न हैं, प्रश्न संख्या **9** से **18 :***
*प्रश्न संख्या **9** से **11** के लिए **5** अङ्क;*
*प्रश्न संख्या **12** व **13** के लिए **3** अङ्क;*
*प्रश्न संख्या **14** व **15** के लिए **2** अङ्क;*
*प्रश्न संख्या **16** व **17** के लिए **3** अङ्क एवं*
*प्रश्न संख्या **18** के लिए **4** अङ्क निर्धारित हैं।*

(viii) *In addition to this, separate instructions are given with each section and question, wherever necessary.*
*इसके अतिरिक्त, आवश्यकतानुसार प्रत्येक खण्ड और प्रश्न के साथ यथोचित निर्देश दिए गए हैं।*

## 'क' खण्ड :

## अपठित - अवबोधनम् 10

1. अतिविशालं खलु संस्कृतसाहित्यम्। अस्मिन् नानाविषयसम्बद्धाः ग्रन्थाः प्राप्यन्ते। एतेषां मध्ये एकं पुस्तकम् एतादृशमपि अस्ति, यस्य कीर्तिः इतः पञ्चदशशतवर्षपूर्वं भारतवर्षस्य सीमानम् अतिक्रम्य विदेशेष्वपि प्रसृता अभवत्। अस्य नामास्ति पञ्चतन्त्रम्, यस्य लेखकः विष्णुशर्मा अस्ति। यद्यपि कस्यचित् अमरशक्तेः नाम्नः भूपतेः राजनीतिज्ञानशून्यान् चतुरः पुत्रान् शिक्षयितुम् एतद् विरचितम् आसीत् परं शीघ्रमेव पुस्तकमेतद् अतिप्रसिद्धं सञ्जातम्। पुरा ईरानदेशस्य राजा नौशेर वाँ अस्य गुणान् उपयोगितां च निशम्य एतत् पठितुम् ऐच्छत्। अतस्तेन हकीम बुरजोईनामकः सभापण्डितः भारतं प्रति प्रेषितः। सः वर्षद्वयम् अत्र उषित्वा संस्कृतभाषाम् अधीतवान्। पुनश्च पहलवीभाषया अस्य भाषान्तरम् अकरोत्। पञ्चतन्त्रं संस्कृतसाहित्यस्य प्रथमा एतादृशी कृतिः अस्ति, यस्याः कस्याञ्चन वैदेशिकभाषायाम् अनुवादः सञ्जातः।

**प्रश्ना :**

(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) **1x2=2**

(i) संस्कृतसाहित्यं कीदृशम् अस्ति ?

(ii) कस्य भूपतेः पुत्रान् शिक्षयितुम् एतत् पुस्तकं विरचितम् ?

(iii) कया भाषया भाषान्तरम् अकरोत् ?

(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) **2x2=4**

(i) पञ्चतन्त्रस्य कीर्तिः काम् अतिक्रम्य विदेषेष्वपि प्रसृताऽभवत् ?

(ii) कान् शिक्षयितुम् पञ्चतन्त्रं विरचितम् ?

(iii) राजा नौशेर वाँ किं निशम्य पञ्चतन्त्रं पठितुम् ऐच्छत् ?

(इ) अस्य गद्यांशस्य शीर्षकं लिखत : **1**

(ई) निर्देशानुसारम् उत्तरं चिनुत - (केवलं प्रश्नत्रयम्) **1x3=3**

(i) 'ग्रन्थाः' इति पदस्य विशेषणपदं किम् ?

(क) नानाविषयसम्बद्धाः (ख) चतुरः

(ग) प्रथमा (घ) यस्याः

(ii) 'यशः' इति पदस्य पर्यायपदं किम् ?

(क) चतुरः (ख) उषित्वा

(ग) कीर्तिः (घ) सभापण्डितः

(iii) 'मन्दम्' इति पदस्य विलोमपदं चिनुत :

(क) पठितुम् (ख) अतिविशालम् (ग) शीघ्रम् (घ) कृतिः

(iv) ''तेन'' इति कर्तृपदस्य क्रियापदं किं प्रयुक्तम् ?

(क) अधीतवान् (ख) प्रेषितः (ग) अस्ति (घ) संजातः

## 'ख' खण्डः

### रचनात्मक-कार्यम्  15

**2.** दीपावलि-पर्वणः अवसरे मित्रं गृहे निमन्त्रयितुम् अधोलिखित-पत्रे मञ्जूषातः पदानि चित्वा रिक्तस्थानपूर्तिं कृत्वा पुनः लिखत - ½x10=5

प्रियमित्र योगेन्द्र! दिल्लीतः

(i) _________ नमो नमः।

अत्र कुशलं तत्राप्यस्तु। आगामिमासे (ii) _________ दीपावली समायाति। एतदवसरे (iii) _________ त्वां दिल्लीनगरे (iv) _________ द्रष्टुं निमन्त्रयामि। अत्रत्या दीपावली (v) _________ अस्ति। अत्रप्रमुखभवनानि नानावर्णोपेताभिः (vi) _________ अलङ्क्रियन्ते। यदा एतासां (vii)_________ रात्रौ भवति, तदा तद् दृश्यम् अतीवमनोहारि नेत्राकर्षकं च भवति। तदनन्तरम् (viii)_________ प्रज्ज्वाल्यन्ते, तेषां स्फुलिङ्गाः नभसि उच्चैः गत्वा विविधवर्णोपेतं दृश्यं स्थापयन्ति। (ix) _________ नूनम् अत्र आगन्तव्यम्। मातृपित्रोः चरणकमलेषु मे (x) _________ निवेदनीयाः।

तव अभिन्नहृदयम्

सुरेन्द्रः

| मञ्जूषा |
|---|
| प्रणामाञ्जलयः, त्वया, सप्रेम, प्रकाशपर्व, आग्नेयक्रीडनकानि, अतिप्रसिद्धा, विद्युल्लताभिः, अहम्, दीपावलिशोभाम्, शोभा |

**3.** मञ्जूषाप्रदत्तशब्दानां सहायतया अधोलिखितायां लघुकथायां रिक्तस्थानानि पूरयित्वा कथां पुनः लिखत : ½x10=5

कस्मिंश्चिद् ग्रामे कश्चन (i) _________ वृद्धः आम्रवृक्षस्य आरोपणं करोति स्म। तं दृष्ट्वा (ii) _________ आगच्छन् कश्चन युवा तं वृद्धम् (iii) _________ "भो वृद्ध! आम्रवृक्षाः तु प्रायः दशवर्षानन्तरं (iv) _________ । तव अवस्थां (v) _________ प्रतीयते यद् यदा अयं वृक्षः (vi) _________ दास्यति, तदा त्वं जीवितो न (vii)_________। अतः किं वृथाः (viii) _________? एतत् निशम्य वृद्धः तत्र फलयुक्तान् वृक्षान् इंगित्वा (ix) _________ यथा मया अन्यैः आरोपितानां वृक्षाणां फलानि खादितानि, एवमेव अन्येऽपि मया आरोपितानां वृक्षाणां फलानि खादिष्यन्ति इति (x) _________ अहं वृक्षम् आरोपयामि।"

| मञ्जूषा |
|---|
| अकथयत्, अशीतिवर्षीयः विचार्य, नगराद्, परिश्रमेण, दृष्ट्वा, फलन्ति, भविष्यसि, फलानि, अपृच्छत्। |

**अथवा**

अधोलिखितसंवादे रिक्तस्थानानि पूरयत : **1x5=5**

ऋषभ: - भो संजय! किं त्वं जानासि यत् गान्धि-महोदयस्य जन्मदिवस: कदा आयाति?

संजय: - मित्र! (i) ______________________________।

ऋषभ: - अक्टूबरमासस्य द्वितीये दिवसे तु अन्यमहापुरुषस्यापि जन्मदिवसो भवति। किं जानासि तस्य नाम?

संजय: (ii) ______________________________ ।

ऋषभ: - शोभनम् उक्तम्। श्री लालबहादुरशास्त्री तु देशस्य पूर्वप्रधानमन्त्री आसीत्। स: अतीवसरल: सौम्य: देशभक्तश्चासीत्। तेन का उद्घोषणा कृता?

संजय: (iii) ______________________________ ।

ऋषभ: - सत्यमुक्तम्। अस्माकं पूर्वप्रधानमन्त्री श्री अटल बिहारी वाजपेयी अपि उद्घोषितवान् "जय जवान, जय किसान, जय विज्ञान च" अस्मिन् दिने कीदृशानां वस्त्राणां मूल्यं न्यूनं भवति?

संजय: - मित्र! (iv) ______________________________ ।

ऋषभ: - शोभनम्। वस्तुत: 'खादी' तु भारतस्य कुटीरोद्योग: अस्ति। गान्धी - महोदय: खादीवस्त्रनिर्माणाय किं यन्त्रं चालयति स्म?

संजय: - (v) ______________________________।

ऋषभ: - सत्यमुक्तम्। चरखायन्त्रस्य तु स्वतन्त्रतान्दोलने प्रमुखा भूमिका आसीत्। अत: खादीवस्त्राणां प्रयोग: अवश्यमेव करणीय:।

**मञ्जूषा**

| |
|---|
| (क) आम् जानामि तस्य नाम श्रीलालबहादुरशास्त्री अस्ति। |
| (ख) खादीवस्त्राणां मूल्यं न्यूनं भवति। |
| (ग) अक्टूबरमासस्य द्वितीये दिवसे आयाति। |
| (घ) तेन "जय जवान, जय किसान" इति घोषणा कृता। |
| (ङ) गान्धी-महोदय: चरखायन्त्रं चालयति स्म। |

**4.** अधोलिखितवाक्येषु केषाञ्चन पञ्चवाक्यानां संस्कृतेन अनुवादं कुरुत : **1x5=5**

(i) विनीता प्रतिदिन विद्यालय जाती है।
Vineeta goes to School everyday.

(ii) बालिकाएं संस्कृत गीत गाती हैं।
The Girls sing Sanskrit song.

(iii) मैं कल बाजार जाऊँगा।
I will go to market tomorrow.

(iv) प्रभात भिक्षुक को रुपये देता है।
Prabhat gives rupees to Beggar.

(v) मैंने कल जंगल में शेर को देखा।

I saw a lion in the jungle yesterday.

(vi) गाय का दूध अमृत की तरह होता है।

Cow's milk is like nectar.

(vii) परिश्रम से ही सफलता प्राप्त होती है।

Success comes only from hard work.

**'ग' खण्ड :**

**अनुप्रयुक्त - व्याकरणम्** **20**

**5.** अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिच्छेदं सन्धिं वा कुरुत - (केवलं प्रश्नषट्कम्) **1x6=6**

(i) एतदनुशासनम् ।

(ii) वैवस्वतो मनुर्नाम माननीयो मनीषिणाम्।

(iii) हन्त! अस्मान् अविज्ञाय + उपालभसे।

(iv) रूपं प्रसिद्धं न बुधाः + तदाहुः।

(v) इत्युक्त्वा ऋतध्वजः तूष्णीम् अतिष्ठत्।

(vi) अहम् आसुरीष्वेव योनिषु क्षिपामि।

(vii) सत्यं क्षान्तोऽयम् अपराधः।

**6.** अधोलिखितवाक्येषु रेखाङ्कितपदानां उचितं समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्यः चिनुत। (केवलं प्रश्नपञ्चकम्) **1x5=5**

(i) अलूक्षाः धर्मकामाः स्युः।

(क) लूक्षाः अनु (ख) लूक्षाभावः

(ग) न लूक्षा (घ) लूक्षस्य पश्चात्

(ii) परस्परम् अनुव्रतौ पतिपत्न्यौ त्रिवर्गं साधयतः।

(क) त्रीन् वर्गान् (ख) वर्गाणां त्रयम्

(ग) त्रयाणां वर्गाणां समाहारः (घ) त्रयाणां वर्गम्

(iii) स्वयमेव कुलगुरुं पितरौ च सभाजयितुं गमिष्यावः

(क) माता च पिता च (ख) मातुःच पितुःच

(ग) मातरौ च पितरौ च (घ) पिता च माता च अनयोः समाहारः

(iv) यक्ष्ये दास्यामि इति अज्ञानविमोहिताः।

(क) अज्ञानं विमोहिताः (ख) अज्ञानस्य विमोहिताः

(ग) अज्ञानाय विमोहिताः (घ) अज्ञानेन विमोहिताः

(v) कथं सन्यासिनोऽपि कठोरभाषणैः तिरस्करोषि।

(क) कठोरस्य भाषणैः (ख) कठोरं भाषणैः

(ग) कठोरैः भाषणैः (घ) कठोरात् भाषणैः

(vi) तत्किमपि यथेच्छं पृच्छ।

(क) इच्छाम् अनतिक्रम्य (ख) अतिक्रम्य इच्छाम्

(ग) इच्छम् अतिक्रम्य (घ) इच्छया अनतिक्रम्य

7. अधोलिखितवाक्येषु रेखाङ्कितपदानां सयुक्तं विभक्तं वा प्रदत्तविकल्पेभ्यः समुचितपदं चिनुत- (केवलं प्रश्नषट्कम्) **1x6=6**

(i) कृतालङ्कार भूतो गतः।

(क) गम् + अनीयर् (ख) गम् + क्तवतु

(ग) गम् + क्त (घ) गम् + शानच्

(ii) सत्यान्न प्रमदितव्यम्।

(क) प्रमद् + तव्यत् (ख) प्रमद् + अनीयर्

(ग) प्रमद् + शतृ (घ) प्रमद् + मतुप्

(iii) मैथिल + ङीप् किं व्यवसितम्?

(क) मैथिलि (ख) मैथिली

(ग) मिथिला (घ) मिथिली

(iv) दौवारिकस्तु तं नयन् एव प्राचलत्।

(क) नी + शतृ (ख) नी + क्त

(ग) नी + मतुप् (घ) नी + तव्यत्

(v) कर्माणि आरभमाणं पुरुषं श्रीनिषेवते।

(क) आरभ् + शानच् (ख) आरभ् + क्त

(ग) आरभ् + मतुप् (घ) आरभ् + तव्यत्

(vi) राजाज्ञा पालनीया एव।

(क) पाल् + तुमुन् (ख) पाल् + अनीयर्

(ग) पाल् + क्त (घ) पाल् + तव्यत्

(vii) अभिजातस्य सत्यम् अलोलुपत्वम् इति दैवीं सम्पदं भवति।

(क) अलोलुप + क्तवतु (ख) अलोलुप + तव्यत्

(ग) अलोलुप + त्व (घ) अलोलुप + शानच्

(viii) मदालसा सर्वविद्यानिष्णाता जात+टाप्।

(क) जनता (ख) जाता

(ग) जनटा (घ) जाटा

**8.** समुचितं उपपद-विभक्ति रूपं चिनुत - (केवलं प्रश्नत्रयम्) **1x3=3**

(i) _________ न प्रमदतिव्यम्।

(क) कुशलतात् (ख) कुशलेन

(ग) कुशलम् (घ) कुशलस्य

(ii) _________ सह सीता वनं गन्तुम् इच्छति।

(क) रामस्य (ख) रामम्

(ग) रामेण (घ) रामाय

(iii) राजा राज्यं _________ दत्वा तदुत्सङ्गे भोजं मुमोच।

(क) मुञ्जस्य (ख) मुञ्जम्

(ग) मुञ्जः (घ) मुञ्जाय

(iv) कोऽन्योऽस्ति सदृशो _________ ।

(क) माम् (ख) मया

(ग) मम (घ) मह्यम्

(v) आकारये अहं _________ तुम्बुरुम्।

(क) कुलगुरुणा (ख) कुलगुरुम्

(ग) कुलगुरोः (घ) कुलगुरवे

## 'घ' खण्ड : I

## पठित-अवबोधनम् **25**

**9.** अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत - **5**

पुरा धारा राज्ये सिन्धुलसंज्ञो राजा चिरं प्रजाः पर्यपालयत्। तस्य वार्धक्ये भोज इति पुत्रः समजनि। सः यदा पञ्चवार्षिकस्तदा पिता हि आत्मनो जरां ज्ञात्वा मुख्यामात्यान् आहूय अनुजं मुञ्जं महाबलमालोक्य पुत्रं च बालं संवीक्ष्य विचारयामास- यद्यहं राज्यलक्ष्मी-भारधारणसमर्थं सहोदरम् अपहाय राज्यं पुत्राय प्रयच्छामि, तदा लोकापवादः। अथवा बालं मे पुत्रं मुञ्जो राज्यलोभाद् विषादिना मारयिष्यति तदा दत्तमपि राज्यं वृथा। पुत्रहानिः वंशोच्छेदश्च इति विचार्य राज्यं मुञ्जाय दत्वा तदुत्सङ्गे भोजम् आत्मानं मुमोच। ततःक्रमाद् राजनि दिवङ्गते सम्प्राप्तराज्यसम्पत्तिः मुञ्जो मुख्यामात्यं बुद्धिसागरनामानं व्यापारमुद्रया दूरीकृत्य तत्पदे अन्यं नियोजयामास।

(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) **½x2=1**

(i) राजा चिरं काः पर्यपालयत्?

(ii) भोजः कदा समजनि?

(iii) बुद्धिसागरनामानं कया दूरीकृत्य तत्पदे अन्यं नियोजयामास?

(आ) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्) **1x2=2**

(i) राजा आत्मनः जरां ज्ञात्वा किं विचारयामास?

(ii) राजा किं विचार्य राज्यं मुञ्जाय दत्वा तदुत्सङ्गे आत्मानं भोजं मुमोच?

(iii) राजनि दिवङ्गते मुञ्जः किं कृतवान्?

(इ) यथानिर्देशम् उत्तरत – (केवलं प्रश्नद्वयम्) **1x2=2**

(i) 'सिन्धुलसंज्ञः' इति कर्तृपदस्य क्रियापदं किम्?

(ii) 'सहोदरम्' इति पदस्य विशेषणपदं किं प्रयुक्तम्?

(iii) ''यौवने'' इति पदस्य विलोमपदं किं प्रयुक्तम्?

**10.** अधोलिखितं श्लोकं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत – **5**

गुणी गुणं वेत्ति न वेत्ति निर्गुणः,
बली बलं वेत्ति न वेत्ति निर्बलः।
पिको वसन्तस्य गुणं न वायसः,
करी च सिंहस्य बलं न मूषकः।।

**प्रश्नाः**

(अ) एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) **½x2=1**

(i) गुणी कं वेत्ति?

(ii) पिकः कस्य गुणं जानाति?

(iii) निर्बलः कं न वेत्ति?

(आ) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्) **1x2=2**

(i) सिंहस्य बलं कः न जानाति?

(ii) करी कस्य बलं जानाति?

(iii) वायसः कस्य गुणं न जानाति?

(इ) यथानिर्देशम् उत्तरत – (केवलं प्रश्नद्वयम्) **1x2=2**

(i) 'कोकिलः' इति पदस्य पर्यायपदं किम्?

(ii) 'निर्बलः' इति पदस्य विपर्ययपदं किम्?

(iii) 'गुणी' इति कर्तृपदस्य क्रियापदं किम्?

**11.** अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत – **5**

ऋतध्वज: – अहो शोभनं गन्धर्वराजविश्वावसो: राजोद्यानम्। आम्रमञ्जरीणां परां शोभां दृष्ट्वा कोकिलानां च मधुरवचांसि श्रुत्वा कस्य यूनो हृदयं सहसा उत्कण्ठितं न भविष्यति? वामपार्श्वे रमणीनाम् आलाप इव श्रूयते अत्रैव स्थित्वा श्रोष्यामि।

कुण्डला – सखि मदालसे! त्वं तु केवलं विद्याध्ययने एव रता कियन्तं कालं यावत् ब्रह्मचर्यव्रतं धारयिष्यसि?

मदालसा – ज्ञानोदधिस्तु अनन्तपारो गभीरश्च। मया सागरतटे स्थित्वा कतिपयबिन्दव एव प्राप्ता अद्यावधि।

कुण्डला – विनयशीले! विद्या ददाति विनयम् अत एव एवं भणसि। कुलगुरुतुम्बरुमहाभागैस्तु गन्धर्वराजाय अन्यदेव सूचितम्।

मदालसा – किं श्रुतं त्वया यद् गुरुवर्यै: माम् अधिकृत्य पित्रे कथितम्?

कुण्डला – अथ किम्। राजकुमारी मदालसा सर्वविद्यानिष्णाता जाता, परं तया स्वयं वर: न प्राप्त: अत: तस्यै योग्यवरस्य अन्वेषणं कार्यम् इत्यासीद् गुरुपादानां मतम्।

**प्रश्ना:**

(अ) एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) **½x2=1**

(i) राजोद्यानं कस्य अस्ति?

(ii) विद्या किं ददाति?

(iii) कासां मधुरवचांसि श्रुत्वा यूनो हृदयं उत्कण्ठितं भवति?

(आ) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्) **1x2=2**

(i) वामपार्श्वे किं श्रूयते?

(ii) ज्ञानोदधि: कीदृश:?

(iii) राजकुमारी मदालसा कीदृशी जाता?

(इ) यथानिर्देशम् उत्तरत – (केवलं प्रश्नद्वयम्) **1x2=2**

(i) 'विद्या ददाति विनयम्' अत्र क्रियापदं किम्?

(ii) 'परां शोभाम्' अत्र विशेष्यपदं किम्?

(iii) 'जनकाय' इति पदस्य कृते पर्यायपदं किं प्रयुक्तम्?

**12.** अधोलिखितस्य पद्यस्य भावार्थं मञ्जूषाप्रदत्त – शब्दै: पूरयित्वा पुन: लिखत – **1x3=3**

(क) ''प्रवृत्तिं च निवृत्तिं च जना न विदुरासुरा:।
न शौचं नापि चाऽऽ चारो न सत्यं तेषु विद्यते।।

भावार्थः -

श्रीकृष्णः कथयति- यत् आसुरीसम्पद्युक्ताः जनाः कर्तव्याकर्तव्यभेदं न (i) __________ । एतस्मादेव आसुराणां जनानां कर्तव्यकर्मणि (ii) __________ न भवति, तथा च दुष्टकार्येभ्यः (iii)__________ न भवति। एतादृशेषु जनेषु पवित्रता श्रेष्ठम् आचरणम् सत्यवचनम् इत्यादिः तु किञ्चिदपि न विद्यते।

| मञ्जूषा |
|---|
| निवृत्तिः, जानन्ति, प्रवृत्तिः |

**अथवा**

(ख) प्रदत्तभावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत - **1x3=3**

(अ) "अनन्यशासनामुर्वी शशासैकपुरीमिव"।

(i) न अन्यशासकेन शासितां पृथ्वीम् एकपुरीमिव शासनं चकार।

(ii) अन्यशासकेन शासितां वसुधां शशास।

(iii) स्वशासकेन शासितं नगरं रक्षितवान्।

(ब) "त्रिविधं नरकस्येदं द्वारम्।

(i) नरकस्यद्वारं त्रिविधं कथितम्।

(ii) द्वारपालस्य नाम त्रिविधम् अस्ति।

(iii) नरकासुरस्य इदं द्वारम् अस्ति।

(स) "दीर्घप्रयासेन कृतं वस्तु विनाशं गच्छति"।

(i) बहुप्रयत्नेन साधितं वस्तु विनाशं गच्छति।

(ii) महता प्रयत्नेन साधितं कार्यं विनश्यति।

(iii) अतियत्नेन कृतं कार्यं तिष्ठति।

**13.** अधोलिखितश्लोकस्य प्रदत्ते अन्वये रिक्तस्थानानि मञ्जूषाप्रदत्तशब्दानां सहायतया पूरयत - **1x3=3**

अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम्।
सर्वस्य लोचनं शास्त्रं, यस्य नास्त्यन्ध एव सः।।

अन्वयः - शास्त्रम् (i) __________ परोक्षार्थस्य (ii) __________ सर्वस्य लोचनं यस्य न अस्ति सः (iii) __________ एव।

| मञ्जूषा |
|---|
| अन्धः, अनेकसंशयोच्छेदि,दर्शकम् |

**14.** 'क' स्तम्भस्य वाक्यानां 'ख' स्तम्भस्य उपयुक्तैः वाक्यैः सह सार्थकं संयोजनं कुरुत - **½x4=2**

| **'क' स्तम्भः** | **'ख' स्तम्भः** |
|---|---|
| (i) आसुरीं योनिमापन्ना | (अ) विभूषणं मौनमपण्डितानाम्। |
| (ii) विशेषतः सर्वविदां समाजे | (ब) मूढा जन्मनि जन्मनि। |
| (iii) ज्ञाने मौनं क्षमा शक्तौ | (स) भुवि शोच्यासने नृपे। |
| (iv) क्रमप्राप्ते हृते राज्ये | (द) त्यागे श्लाघविपर्ययः। |

**15.** अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुसारं शुद्धम् अर्थं मञ्जूषात: चित्वा लिखत – **½x4=2**

(i) त्यागाय संभृतार्थानां सत्याय मितभाषिणाम्।

(ii) आ: अपण्डित: खलु भवान्।

(iii) स्वायत्तमेकान्तगुणं विधात्रा।

(iv) यानि अनवद्यानि कर्माणि।

| **मञ्जूषा** |
|---|
| मूर्ख: , अल्पभाषिणाम्, ब्रह्मणा, अनिन्द्यानि। |

## 'घ' खण्ड: II

## संस्कृतसाहित्यस्येतिहास-परिचय: **10**

**16.** अधोलिखितानां प्रश्नानाम् उत्तराणि लिखत – **1x3=3**

(i) ''प्रजानुरञ्जको नृप:'' इति पाठस्य सन्दर्भग्रन्थ: क: ?

(ii) 'मदालसा' पाठस्य लेखिका का ?

(iii) शिवराजविजयस्य लेखक: क: ?

**17.** मञ्जूषायां प्रदत्त शब्दानां साहाय्येन रिक्तस्थानानि पूरयित्वा लिखत – (केवलं प्रश्नत्रयम्) **1x3=3**

(i) छन्दोयुक्तं __________ भवति।

(ii) मेघदूतम् __________ अस्ति।

(iii) गद्यपद्यमयं काव्यं __________ इत्यभिधीयते।

(iv) गद्यं कवीनां __________ वदन्ति।

| **मञ्जूषा** |
|---|
| चम्पू: निकषम्, पद्यम् खण्डकाव्यम् |

**18.** समुचितं मेलयत – **1x4=4**

| | |
|---|---|
| (i) हास्यकलाकार: | (अ) नाटकम्। |
| (ii) काव्येषु __________रम्यम् | (ब) भरतवाक्यम्। |
| (iii) नाट्यशास्त्र-रचयिता | (स) विदूषक:। |
| (iv) नाटकस्य अन्ते __________भवति | (द) भरतमुनि:। |

-o0o-